# Shri Ramanujavaibhavahetu Shlokah

# શ્રીરામાનુજવૈભવહેતુશ્લોકઃ

## Document Information

Text title : Shri Ramanujavaibhavahetu Shlokah

File name : rAmAnujavaibhavahetushlokaH.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description/comments : Ramanujastotraratnavali, Ramanuja Sampradaya. (Prayer to Shri Ramanujacharya)

Latest update : December 25, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

Shri Ramanujavaibhavahetu Shlokah

# શ્રીરામાનુજવૈભવહેતુશ્લોકઃ

શ્રીવરદવિષ્ણુમહાગુરુભિરનુગૃહીતઃ શ્રીરામાનુજવૈભવહેતુશ્લોકઃ (૧)

॥ શ્રીઃ ॥

॥ શ્રીમતે રામાનુજાય નમઃ ॥

॥ શ્રીવાત્સ્યવરદવિષ્ણુમહાગુરવે નમઃ ॥

યસ્મિન્ પદં યતિવરસ્ય મુખાત્ પ્રણેતુઃ
નિષ્કામદેવ વિદધે નિગમાન્તભાષ્યમ્ ।
તસ્યૈવ તં ભગવતઃ પ્રિયભાગિનેયં
વન્દામહે વરદવિષ્ણુપદાભિધેયમ્ ॥

Footnote

(૧) કદાચિત્ શ્રીરામાનુજપદાશ્રયાઃ વિદ્વાંસઃ
“શ્રી ભગવદ્રામાનુજસ્ય મહિમ્નઃ કો હેતુઃ ?” ઇતિ
શ્રીભગવદ્રામાનુજપ્રિયભાગિનેયં (શ્રીભગવદ્રામાનુજમુનેઃ કનીયસ્યાઃ
ભગિન્યાઃ કમલાનામ્ન્યાઃ કુમારં) “સત્કુર્વતા સંસદિ શિષ્યવર્ગાન્
અનન્યલભ્યૈરખિલૈઃ સ્વચિહ્નૈઃ । શ્રીભાષ્યસિંહાસનમાત્મનીનં યસ્મૈ
ચ દત્તં યતિશેખરેણ ॥” ઇત્યાદિકવિગિરા વર્ણ્યમાનવિભવં
શ્રીવાત્સ્યવરદવિષ્ણ્વાર્યમહાગુરું અપૃચ્છન્ । તદાનીં તેન અનેન
શ્લોકેન તેષામુત્તરમુક્તમિતિ સમ્પ્રદાયવિદઃ ॥)

શ્રીમદ્રઙ્ગપતિશ્ચ વેઙ્કટપતિઃ શ્રીવારણાદ્રેઃ પતિઃ
શ્રીયદ્વદ્રિપતિશ્ચ કેચન તથા દિવ્યસ્થલાધીશ્વરાઃ ।
આચાર્યશ્ચ સ યામુનો મુનિવરઃ શ્રીશૈલપૂર્ણસ્તથા
શ્રીરામાનુજસંયમીન્દ્રગુરવે તાદૃક્પ્રસાદં દદુઃ ॥ ૧॥

ઇતિ શ્રીવરદવિષ્ણુમહાગુરુભિરનુગૃહીતઃ શ્રીરામાનુજવૈભવહેતુશ્લોકઃ ।

શ્રુત્યન્તદ્વયપીઠદેશિકમણિઃ શ્રીવત્સવંશાગ્રણીઃ

શ્રીરામાનુજભાગિનય ઇતિ યઃ ખ્યાતઃ ક્ષમામણ્ડલે ।
સ શ્રીહસ્તિગિરીશસેવનપરઃ પ્રત્યસ્તબાહ્યાગમઃ
માહાકારુણ્ણુકિર્ગુણૈઃ વરદવિષ્ણવાખ્યોચિતૈરેધતે ॥

॥ શ્રીવાત્સ્યવરદવિષ્ણુમહાગુરવે નમઃ ॥

Proofread by Aruna Narayanan

*Shri Ramanujavaibhavahetu Shlokah*
pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*